


## ॥ प्रार्थना ॥

भवोद्भव क्लेश कशा शताहतः परिभ्रमन् इन्द्रिय कापथान्तरे । नियम्यतां माधव मे मनो हयः त्वदाङ्घ्रिशङ्कौ दृढभक्ती बन्धने॥

हे माधव ! मम मनः अश्वः इव अस्ति ।संसारचक्रस्य क्लेशान् स्वीकृत्य एतत मनः इन्द्रियभोगस्य कुमार्गे स्वैरं धावति । भवतः चरणौ शन्कुः इव अस्ति । कृपया एनम् मनः रून्धि। भक्तेः दृढेन रज्ज्वा एनम् मनः भवतः चरणयोः बध्नातु ।

## सम्पादकीयम्

एतस्मिन् मासे महोत्सवः अस्ति तस्य नाम गोकुलाष्टमी वा श्रीकृष्णजन्माष्टमी । कीदृशः महोत्सव ? एषा तिथि सर्वे महतउत्साहेन् उत्सवं कुर्वन्ति । वेदे रामायणे च पुराणे तथा महाभारते भगवान हरिः आदौ मध्ये च अन्ते सर्वत्र गीयते । एतत् न पर्याप्तं ब्रह्मा वरूणः इन्द्रः रुद्रः मरूतः च दिव्यैः स्तोत्रैः स्तुवन्ति । ऋषयः सामवेदे वेदाङ्गे उपनिषदे च केवलः हरिः वा कृष्णः एव स्तुवन्ति। योगिनां ध्यानस्य विषयः अपि कृष्णः एव अस्ति । तस्य जन्मतिथि श्रावण कृ. अष्टमी रविवासरे अर्थात् १७ आगस्त २०१४ अस्ति । अतः अस्माकं सिध्दता करणीया ।



यदि कस्मिश्र्चित गृहे कस्यापि बान्धवस्य जन्मदिवसः अस्ति तर्हि सर्वे जनाः तस्य कृते उपहारं आनयन्ति । तस्य प्रियं भोजनं अपि पचन्ति । नूतनानि वस्त्राणि अपि क्रीणन्ति। अन्यसमये यदि अस्माकं उपनगरे कश्चित् पुरुषस्य जन्मदिवसः अस्ति तर्हि जनाः बृहद् फलकं स्थापयन्ति । पिष्टकं शुभेच्छापत्रानि च आनयन्ति । सर्वे तस्य एव स्तुवन्ति । तत्र अस्माकं उद्देशः सः प्रसन्न भवतु इति अस्ति । अतः एव श्रीकृष्णस्य जन्मतिथौस्तौ केवल कृष्णस्य स्तुति लिला किर्तने एव कालव्यापन करणीयम यदि वयं केवल स्वइन्द्रियप्रित्यर्थं चित्रपटस्य संगीते नृत्य कुर्मः यदि वयं नूतनानि वस्त्राणि आभरणानि धरामः तर्हि भगवान प्रसन्न अथवा आनन्दितः न भवति । किन्तु अद्यतनकाले दहिहंडी उत्सव प्रारम्भ अभवत्| सः उत्सव अधिकृतः नास्ति अध्यात्मिकः नास्ति। केवलः कोलाहलः वैदिकसंस्कृतैः अधःपतन च अस्ति । अङ्गप्रदर्शनं अपानियपानं करणीयम् एतत अस्ति । अतः एव अस्माकं चेतसा गोविन्दा आला रे ! इति न । अपितु त्वदियं वस्तुं गोविन्द तुभ्यमेव समर्पये । तेन त्वदङ्घ्रिकमले रतिं मे यच्छ शाश्वतीम् ॥ इति परिवर्तनम् आवश्यकं करणीयम् ।!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!!

## कथा

### दूरदर्शिन् वानरः



कस्मिश्र्चित् नगरे एकः नृपः आसीत् । सः तस्य पुत्रानाम् मनोरञ्जनार्थं राजोद्याने बहुन् वानरान् पालयति स्म। प्रतिदिनं वानराः बहवफलानि विविधानि व्यञ्जनानि खादित्वा सुखेन् उद्याने विचरन्ति स्म। एतेषां वानराणां नेता एकःवृध्दः वानरः आसीत्| सः अतीव बुध्दिमानः । राजप्रासादे बहवः मेषाः अपि आसन् । एकः मेषः प्रतिदिनं प्रासादस्य पाकगृहं गत्वा किमापि व्यञ्जनं खादति स्म । अतः तस्मिन् प्रासादस्य पाचकाः बहुक्रुद्धा भवन्ति ताडयन्ति स्म । एतत दृष्ट्वा वृध्दः वानरः चिन्ति अभवत् । सः सर्वान् वानरान् उक्तवान् । अहं पश्यामि एकः मेषः भोजनार्थं पाकगृहे वारंवारं गच्छति । पाचकाः क्रोध्देन् तस्य देहे ज्वलन्तं काष्ठं क्षिपति। यदि तत् मेषं दहते सः सर्वत्र धाविष्यति । यदि सः अश्वगृहं प्रवेशं करिष्यति तर्हि तत्र शुष्कतृणम् आशु प्रज्वलितं भविष्यति । यदि अग्निः अश्वान् अपि दहति तर्हि अस्माकं कृते विशालं व्यसनम् । किमर्थम्?अहं श्रुतवान् अश्वानाम् दाहनस्य उपायः वानरस्य त्वक् । नृपः अस्माकं सर्वेषां वधस्य आदेशं दास्यति । एतत् निश्चितम् । अतः वयं राजोद्यानं त्यक्त्वा वनं गमिष्यामः ।

एतत् श्रुत्वा सर्वे वानराः अहसन् । ते चिन्तितवन्तः वृध्दस्य वानरस्य भयम् अकारणम् । ते तं उक्तवन्तः भवान् वृध्दः भवति अतः मूर्खसदृशं वदति । किमर्थं वयं राजप्रासादस्य आनन्दं त्यजामः? भवान् गच्छतु । वयं अत्रैव तिष्ठामः । वृध्दः वानरः बहुदुःखी अभवत् । किन्तु अन्ये वानराः तं मुर्खं चिन्तयित्वा अनादरं कुर्वन्ति एतत् दृष्ट्वा सः गमनार्थं सिध्दम् अभवत् । वानराणां विनाशः समीपं आसित् इति चिन्तयित्वा सः एकाकी वनं गतवान् । अल्प दिनानन्तरं यत् वृध्दः वानरः चिन्तितवान् तत् अभवत् । मेषस्य कारणेन अश्वाः ज्वलिताः । नृपः अश्वानाम् उपचारार्थं सर्वेषां वानरानां वधस्य आदेशं दत्तवान् । एवं सर्वे वानराः मृताः अभवत् ।

**तात्पर्यः** मुर्खाः शिष्याः गुरुम् बुध्दिहीनं मत्वा तस्य आदेशस्य अवहेलनां कुर्वन्ति विनश्यन्ति च ।

प्रकाशनं मुद्रणं च संकेत- धीरशांत दासः, कनाई कृष्ण दासः,पाक्षिकः संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८ अणुपत्रम् संकेत sanskritprabhatam@gmail.com. d16108@gmail.com, भ्र.ध्व.-८८८८८४४६४८/९४२३२३४४३ 




## संभाषणम्




## काव्यविनोदः

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।

श्वा यदि क्रियते राजा स किं नाश्नात्युपाहनम् ॥

| पूर्व पदरञ्जन्याः उत्तरम् | | | | | |
|---|---|---|---|---|---|
| १ नृ | | २ का | म | धे | ३ नू |
| ४ प | र | म | | | ति |
| | ५ प्र | दे | ६ श | : | |
| ७ ऐ | रा | व | त | | ८ ना |
| क्ष | | | | ९ प | र |
| १० व | टि | का | | य | द |

| पदरञ्जनी | | | | | |
|---|---|---|---|---|---|
| | १ | | | | २ |
| ३ | | | | ४ | |
| ५ | ६ | | ७ | | |
| | | ८ | | ११ | |
| ९ | १२ | | १० | | |
| | १३ | | | | |

**दिगंतसम शब्द** -१. एषा वस्तु भोजनम् / औषधिम् सेवनार्थम् उपयोगं कुरुते। ३.सः गौपालकः /अन्न उत्पादक अस्ति। ४. आहुति/भोग ५. भोजन सिध्दताः ६.जलम।८.दुष्यन्तस्य पुत्र।९. वैदिकः श्लोकः। १०. कृष्णस्य सारथिः। १३. कमलः।

**ऊर्ध्व शब्द** - १.पानिलम् /एकं पात्रम्।२. अन्धकारमयम् अरण्यम्।

३आशिषः / दया / करुणा।७. लक्ष्मी।११.युवकः।१२.धनुष्य।

## चिन्तनीयम्

केशवम्पतितं दृष्ट्वा पाण्डवाः हर्ष निर्भराः। रुदन्ति कौरवाः सर्वे हा हा केशव हा हा केशव ॥

शब्दार्थ- कः - जलम्, शवम् - मृत्शरीरम्, पाण्डवः - बकः/मत्स्यः, कौरवः - काकः। अनुवाद- एकं मृतशरीरं जलाशये पतति। तं दृष्ट्वा मत्स्याः मोदन्ते। किन्तु केचित् काकाः जलाशयस्य समीपे सन्ति ते रुदन्ति ! हा हा शवम् अपतत् !

## सुभाषितम्

दुर्जनेन समं सख्यं प्रीतिं न कारयेत्। उष्णो दहति चांगारः शीतः कृष्णायते करम् ॥

सर्वदा सर्वत्र दुर्जनस्य सङ्गः त्यजतु। दुर्जनः अंगारस्य इव अस्ति। यदिः अंगार उष्णः अस्ति तर्हि दहति। यदि शीत अस्ति तर्हि करं कृष्णं करोति। दुर्जनस्य सख्यं शत्रुत्वं च संकटम ॥